# पौरस्त्यसाहित्ये नाट्योत्पत्तिः

**शिवराजलामिछाने**

Department of Sanskrit Literature
Sharada Vidyapeeth , Mahendranagar, Nepal

*Submitted: 19 Nov. 2025*
*Reviewed: 21 Dec. 2025*
*Accepted: 29 Dec. 2025*

**DOI:** *10.3126/kdk.v6i1.90131*

***Corresponding Author:***
Shiva Raj Lamichhane

***Email:*** *shivarajlamichhane01@gmail.com*

**ORCID:***https://orcid.org/0009-0002-5437-3331*

*Copyright 2026 © the Author (s) and the Publisher*

**कौमोदकी**
***Kaumodaki***
**Journal of Multidisciplinary Studies**
A Peer-Reviewed, Open Access Journal

**ISSN :**
2822 - 1567 (Print)
2822 - 1583 (Online)
https://www.nepjol.info/index.php/kdk/about

**Published by :**
Research Management Cell
Shree Vinduwasini Sanskrit Vidyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

**सारः** संस्कृतसाहित्ये नाट्यसाहित्यस्य स्थानं विपुलं वर्तते, यतो हि विश्वसाहित्ये संस्कृतसाहित्यस्य महिममण्डितं स्थानं प्रायेण नाट्यसाहित्येनैव निर्दिष्टमस्ति । एतादृशस्य नाट्यसाहित्यस्यारम्भः कथं समभवदिति जिज्ञासायाः समाधानायासोऽत्रालेखे विहितो वर्तते । तदर्थमत्र वेदे प्रयुक्तानां नाट्यसम्बद्धानां शब्दानां संवादाभिनयादीनां नाट्याङ्गानां समीक्षणं विहितमस्ति । पौराणिककाले नाट्यस्य विद्यमानतां तत्सम्पन्नतां च साधयितुमत्र रामायणे, महाभारते, ब्रह्मपुराणे, विष्णुपुराणे, श्रीमद्भागवतमहापुराणे चोपवर्णिता नाट्यसम्बद्धा विषया उपस्थापिता विद्यन्ते । सूत्रकाले नाट्याधिकारं प्रदर्शयितुं च नाट्यविषयसम्बद्धानि पाणिनिसूत्राणि तत्सन्दर्भितानि नटसूत्राणि चात्रोपस्थापितानि सन्ति । कौटिल्यस्यार्थशास्त्रे, वात्स्यायनस्य कामसूत्रे, जैनानां समवायाङ्गसूत्रे, बौद्धधर्मसम्बद्धे विनयपिटके, पतञ्जलेर्महाभाष्ये च प्रवर्णिता नाट्यसन्दर्भाश्चात्र नाट्यारम्भविन्दोरन्वेषणे समुपस्थापिताः सन्ति । नाट्योत्पत्तिं विषयीकृत्य भरतेन नाट्यशास्त्रे सन्दर्भिताः प्रसङ्गा नाट्योद्गमविषयविश्लेषणे चात्रोपस्थापिता विद्यन्ते । पुनश्च लोकसंस्कृतिरपि नाट्यारम्भस्य कारणतामावोढुमर्हतीति धियात्र धार्मिकनृत्यादीनाम्, पुत्तलिकानृत्यस्य, छायानाटकस्य, वीरपूजायाः, रामलीलादीनाम्, प्राकृतिककर्मणां च नाट्यप्रवर्तनविन्दुत्वं विश्लिष्टमस्ति । भौतपुस्तकालयतः साञ्जालिकपुस्तकालयतश्च सामग्रीसङ्कलनं विधाय विषयविश्लेषणं कृत्वाऽऽलेखोऽयं सज्जीकृतो विद्यते । अत्र नूतनः सिद्धान्तः प्रतिपादितो नास्ति, अपि तु विदुषां पूर्वस्थापिताः सिद्धान्ताः विश्लिष्टाः सन्तीति आलेखोऽयं निगमनात्मको विद्यते । यद्यपि बहुभिर्विद्वद्भिर्नाट्योत्पत्तिविषयस्य समीक्षणं विहितमस्ति परं कैश्चिदपि नाट्योत्पत्तेर्विन्दुर्निश्चित्य निर्धारितं नास्ति । सर्वेषां मतसमीक्षणेन नाट्योत्पत्तिर्वस्तुतो मानवसभ्यताया विकाससमकालमेव

*व्यावहारिकरूपेण सञ्जातेति निष्कर्ष उपस्थापयितुं शक्यते । वाङ्मयदृशा तु वेदेषु नाट्यसम्बद्धानां तत्त्वानां सत्त्वाद् वेद एव नाट्योत्पत्तेर्विन्दुत्वेन ग्रहीतुं शक्यः ।*

**शब्दबीजानि-** प्रवृत्तिः, शैलूषः, लास्यम्, सूत्रधारः, प्रेक्षागारः, समवकारः, डिमः ।

**विषयप्रवेशः**

विश्वसाहित्ये संस्कृतसाहित्यस्य महिममण्डितस्थाननिर्धारणाय नाट्यसाहित्यस्य महत्त्वपूर्णमवदानं वर्तते, यतो हि संस्कृतसाहित्ये नाट्यसाहित्यं गुणात्मिकया परिमाणात्मिकया च दृशा विपुलमस्ति । अभिज्ञानशाकुन्तलस्य वैश्विकत्वं संस्कृतनाट्यसाहित्यस्य गुणात्मकदृष्ट्या विपुलत्वे प्रमाणमस्ति चेच्छूद्रकादिभ्य आरभ्य अद्यप्रभृति विरच्यमानानां नाटकानां सङ्ख्या तस्य परिमाणात्मकदृष्ट्या विपुलत्वे प्रमाणमस्ति । एतादृशस्य नाट्यसाहित्यस्यारम्भः कथं समभवदिति जिज्ञासायाः समाधानायासोऽत्रालेखे विहितो वर्तते । पौरस्त्यक्षेत्रे भाषायाः, संस्कृतेः, सभ्यतायाः, परम्परायाः, साहित्यवाङ्मयादीनां च मूलं वेद एवास्ति यतो हि पौरस्त्यपरम्परायां वेदः समस्तविद्यानां स्रोतो विद्यते । वेदमूलत्वादस्माकं संस्कृतिपरम्परासाहित्यादयः सर्वेऽपि देवपरा भवन्ति प्रायेण । पौरस्त्यनाट्यपरम्परा च वेदसम्बद्धा, तेन देवसम्बद्धा चास्ति । देवसम्बद्धाऽपि नाट्यकला लोकोद्भवा वर्तते, यतो हि लोकप्रचलितक्रीडानृत्यादीनामाधारभूमौ नाट्यस्योद्भवः समजनीत्यत्र विदुषां प्रायेण समेषामैकमत्यं दृश्यते । 'एतादृशस्य नाट्यस्योत्पत्तिः कथं जाता ? नाट्यस्यादिमो विन्दुः कः ? कुतो नाट्यारम्भो बभूव ? नाट्यस्य वेदमूलत्वमुत लोकमूलत्वम् ? पुराणादौ नाट्यविषयः समाविष्टोऽस्ति न वा ?' इत्याद्याः प्रश्ना नाट्यस्याध्ययनकाले समीक्षकाणां चेतसि समुत्पद्यन्ते प्रायेण । अनेके समीक्षका वेदानां रामायणमहाभारतादीनां लोकसंस्कृतीनां च बहुधा समीक्षणेनैषां प्रश्नानां समाधानाय यत्नं विहितवन्तो वर्तन्ते । तेषु केषाञ्चन समीक्षकाणां मतसमालोचनेन नाट्यस्योद्गमसम्बद्धो विषयः पर्यालोड्यमानोऽस्ति । तेन "नाट्यस्योत्पत्तिः कुतो जाता ?" इति प्रमुखां समस्यां पुरस्कृत्य तत्समाधानार्थमालेखोऽयं यतमानोऽस्ति । तां समस्यामाधृत्यास्यालेखस्य समाधेयमुद्देश्यं च नाट्योत्पत्तिविन्दोर्निर्धारणपरं निश्चितं वर्तते । तदर्थमत्र नाट्यसाहित्यस्य समीक्षका विविधा ग्रन्था पर्यालोडिताः सन्ति । अत्र नाट्यसाहित्यस्य समीक्षका ये ग्रन्था अध्ययनविषयीकृताः सन्ति, तेभ्यः केवलं नाट्यस्यारम्भविन्दुरेवान्विष्टो वर्तते । तदर्थं तेभ्यो ग्रन्थेभ्यो नाट्यारम्भस्य सम्भावका विषया एव गृहीताः सन्ति, नाट्यस्वरूपविवेचकाः, नाट्यसाहित्यस्य विकासक्रमनिर्देशकाः, नाट्यकृतां नाटकादौ वर्णिता विषयाश्चात्र सङ्गृहीता न सन्ति । नाट्यविकासमुद्दिश्य बहुभिर्विद्वद्भिर्विविधान्यध्ययनानि विहितानि सन्ति । तत्र प्रसङ्गवशात् प्रायेण सर्वैरपि नाट्योत्पत्तिरपि विषयीकृता वर्तते । तेष्वत्राध्ययने कानिचनाध्ययनान्यध्ययनविषयीकृतानि सन्ति । श्यामारमणपाण्डेयमहाभागस्य '*कालिदास का नाट्यकल्प* (ई. १९७४)' इत्याख्यो ग्रन्थः, पारसनाथद्विवेदिनः '*नाट्यशास्त्र का इतिहास* (ई. १९९५)' इत्याख्यो ग्रन्थः, कीर्तिशुक्लानाम्न्या अनुसन्धात्र्याः '*संस्कृत रूपकों में पूर्वरङ्गविधान : एक समीक्षात्मक अध्ययन* (२००४)' इत्याख्यं विद्यावारिधिशोधपत्रम्, धर्मेन्द्रकुमारसिंहदेवाख्यस्यानुसन्धातुः '*नाट्य एवं नाट्यशास्त्र की उपयोगिता* (इन्टरनेसनल जर्नल अफ रिसर्च इन सोसियल साइन्स, वर्षः ९, अङ्कः ४, सन् २०१९)' इति शीर्षकान्वितो लेखश्चेति सामग्र्यो नाट्योत्पत्तिविन्दुमभिलक्ष्यात्रालेखलेखनसन्दर्भे पूर्वकार्यत्वेनाधीता विद्यन्ते । इमाः सामग्र्योऽत्र नाट्योत्पत्तेर्विन्दोरन्वेषणे दिङ्निर्देशं कृतवत्यो विद्यन्ते, यतो हि नाट्यस्य स्वरूपादीनां निरूपणमुद्दिश्य लिखितास्वासु सामग्रीषु प्रसङ्गेन नाट्योत्पत्तिसम्बद्धा विषया अप्युद्भाविताः सन्ति । विषयाणामुद्भावने विहितेऽपि तासु

सामग्रीषु सोहापोहं विविधविदुषां मतसमीक्षणेन निष्कर्षणं विहितं नास्ति । कुत्रचिद् द्वित्राणां विदुषां मतसमीक्षणं तु विहितमस्ति परं कस्यचिद् विशेषस्य पक्षपातित्वं तत्र निष्कर्षणे विघ्नकरं प्रतीयते । अतो नाट्योत्पत्तेर्विषये विविधविदुषां मतसमीक्षणेन निष्पक्षतया खण्डनमण्डनादिपुरःसरं निष्कर्षणं संस्कृतनाट्यसाहित्यस्यानुसन्धातॄणां कृते हितकरमेव स्यादिति धिया इदमेव शोधान्तरालं लक्ष्यीकृत्यालेखोऽयं विरच्यमानो वर्तते ।

**अध्ययनविधिः**

नाट्यस्वरूपस्य समीक्षणमूलेऽस्मिन्नध्ययने सामग्रीसङ्कलनाय पुस्तकालयविधिः प्रयुक्तो विद्यते । पुस्तकालयविधिप्रयोगे च भौतपुस्तकालयेन साकं साञ्जालिकपुस्तकालयस्याप्युपयोगोऽत्र विहितोऽस्ति । तथा सङ्कलितानां सामग्रीणां विश्लेषणेनात्रोक्तानां समस्यानां समाधानार्थं यत्नो विहितो वर्तते । ऋग्वेदः, यजुर्वेदः, अथर्ववेदः, नाट्यशास्त्रम्, अष्टाध्यायी, अर्थशास्त्रम्, कामसूत्रं चेत्याद्या ग्रन्था नाट्योत्पत्तिं विषयीकृत्य लिखिताः 'नाट्यशास्त्र का इतिहास', 'कालिदास का नाट्यकल्प' इत्याद्या ग्रन्थाः, विषयसम्बद्धाः शोधप्रबन्धाः, अनेन विषयेण सन्निहिता आलेखाः, नाट्योत्पत्तिसम्बद्धा अन्ये ग्रन्थाश्चात्र सामग्रीरूपेण कृतोपयोगा विद्यन्ते । नाट्योत्पत्तौ पुराणादीनां भरतशास्त्रस्य च मतनिरूपणे क्वचिद् प्रयुक्तेऽपि विश्लेषणविधौ प्रायेणात्र विविधविदुषां सोहापोहं मतसमीक्षणे तुलनात्मकविधिरेव बहुधा प्रयुक्तोऽस्ति उक्तैर्विधिभिरुक्तानां सामग्रीणां सत्यापनेनात्र निष्कर्षणं विहितमस्ति ।

**सैद्धान्तिकः पर्याधारः**

'नटानां कार्यम्' इत्यर्थे नटशब्दात् 'छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः (अष्टाध्यायी ४/३/१२९' इति पाणिनिसूत्रेण ञ्यप्रत्ययविधानान्निष्पन्नस्य नाट्यशब्दस्यार्थो नृत्यगीतवाद्यं भवतीति शब्दकल्पद्रुमनिर्देशो वर्तते (संस्कृतशब्दकोशः APP) । वाचस्पत्ये तु 'नटस्येदं कृत्यम्' इति नाट्यशब्दविग्रह उपपादितो वर्तते, यस्यार्थत्वेन च तत्र नटकृत्यमिति, नृत्यगीतवाद्यात्मकं लास्यमिति, वाक्यार्थाभिनय इति, तत्फलादिकमिति च निर्दिष्टं वर्तते (संस्कृतशब्दकोशः APP) । वामनशिवराम आप्टेमहोदयेन नटप्रत्ययात् ष्यञ्प्रत्ययेन नाट्यशब्दस्य निष्पत्तिर्विहिता वर्तते । तत्र तेन नाट्यशब्दस्य नृत्यम्, अनुकरणात्मकं चित्रणम्, सहावभावमभिनयश्चेत्याद्यर्था निर्दिष्टाः सन्ति (संस्कृतशब्दकोशः APP) । अत्रालेखे नाट्यत्वेन सहावभावं विधीयमानोऽभिनयो गृहीतो विद्यते ।

संस्कृतसाहित्ये प्रथमतः श्रव्यदृश्यभेदेन काव्यस्य द्वैविध्यं प्रदर्शितमस्ति । श्रव्यकाव्यं प्रायेण वर्णनमूलमस्ति, तत आनन्दग्रहणे श्रोत्रेन्द्रियं सहायं भवति । दृश्यकाव्येऽपि वर्णनं तु भवत्येव परं प्रामुख्यं तत्र चतुर्विधस्याभिनयस्य भवतीति दृश्यकाव्यं नाट्यत्वं स्वीकरोति (नाट्यशास्त्रम्, भूमिका पृ. १) । तत्र दृश्यकाव्यत आनन्दग्रहणे श्रोत्रेन्द्रियेण साकं चक्षुरिन्द्रियस्यापि साहाय्यमपेक्षते । श्रव्ये दृश्ये चोभयत्र शब्दार्थयोः साहित्यम्, रसात्मकत्वम्, गुणोत्कर्षः, अलङ्कारादीनां काव्योत्कर्षाय प्रयोग इत्यादिकानि वैशिष्ट्यानि साम्यं भजन्ते । अन्तरं तु केवलमभिनेयत्वमेव । श्रव्येऽभिनेयत्वं न भवति, दृश्येऽभिनेयत्वं विलसति । नाट्येन तद्गतानां पात्राणां समग्रमपि जीवनमास्वाद्यमनुभवगम्यं च क्रियते । एतेन रसश्चरमानन्दरूपेणास्वाद्यते (नाट्यशास्त्रम्, भूमिका पृ. १) ।

नाट्यशास्त्रस्य पञ्चमवेदत्वं स्वीकृतवानाचार्यो भरतो नाट्यस्य क्रीडनीयकत्वेन ग्रहणं विधाय तत्र मनोरञ्जनोपकरणत्वं निक्षिपति (नाट्यशास्त्रम्, १/११)। नाट्यं किम् ? भरतानुसारेण लोकस्य सुखेन दुःखेन वा समन्वितस्य स्वभावस्याङ्गिकाद्यभिनयैरनुकरणं नाट्यमुच्यते। कथितं चास्ति तेन -

योऽयं स्वभावो लोकस्य सुखदुःखसमन्वितः।

सोऽङ्गाद्यभिनयोपेतो नाट्यमित्यभिधीयते॥ (नाट्यशास्त्रम्, १/१२१)

कारिकामिमां विवृण्वानोऽभिनवगुप्तः पुनर्नाट्यस्वरूपमेवं प्रतिपादितवान् दृश्यते- 'लोकस्य सर्वस्य साधरणतया स्वत्वेन भाव्यमानश्चर्व्यमाणोऽर्थो नाट्यम् (सिद्धान्तशिरोमणि, पृ. २१९) इति। तदनुसारेण साधरणीकरणव्यापारेण स्वस्मिन् प्रतीयमानाः संसारस्य सर्वेऽपि भावा नाट्यपदेनाभिधीयन्ते। एवमन्यैरपि विविधैर्विद्वद्भिर्नाट्यस्य स्वरूपविषये स्वाभिमतान्युपस्थापितानि विद्यन्ते। अस्यालेखस्य विषयो नाट्यस्वरूपनिर्धारणं नास्तीति तद्विषयोऽत्र बहुधा न चर्च्यते, केवलमभिनेयत्वेन समन्वितानि नाट्यान्याधृत्य तदारम्भविन्दोरन्वेषणार्थमत्र पर्याधारो नाट्यं भवतीति विचार्य नाट्यस्वरूपस्य विषय ईषद् विमृष्टो विद्यते।

'नाट्यं भिन्नरुचेर्जनस्य बहुधाऽप्येकं समाराधनम् (मालविकाग्निमित्रम्, १/४)' इति कालिदासोक्तिर्नाट्यस्य महिमवर्धनायालं नितराम्। एतदुक्तिर्नाट्यस्य सर्वजनसंवेद्यतां प्रमाणयति। सर्वजनसंवेद्यत्वमेव विश्वसाहित्ये नाट्यस्य विशिष्टस्थानवत्त्वे कारणं विद्यते। नाट्यस्य सर्वजनसंवेद्यतायाः प्रमुखो हेतुस्तद्विनिमयार्थं विधीयमानश्चतुर्विधोऽभिनय एव। तस्य चतुर्विधस्याभिनयस्य कारणेन नाट्यं सचेतसो माध्यमभाषाया ज्ञानेन विनापि बोद्धुं पारयन्ति। नाट्यं रसप्रधानं भावप्रधानं वा भवति, स च रसो भावो वाऽभिनयस्य माध्यमेन सचेतसां चेतसि स्वाभाविकतया स्थानमावहति। अत्र प्रयासो नापेक्ष्यते।

**वेदेषु नाट्यतत्त्वानां प्रयोगः**

साहित्ये मानवानां कल्याणाय ज्ञानराशेः सञ्चयो विधीयते। अनेनैव कारणेनास्माकं प्राचीनतमसाहित्यस्य वेदस्य संहितेति नाम्नाऽभिधानं कृतमस्ति। कस्यापि सुसंस्कृतस्य सुविकसितस्य च समाजस्य प्रतिबिम्बनं कुर्वाणे साहित्ये वयं तात्कालिकानां क्रियाणां युगसंस्कृतीनां च सजीवं स्वरूपं प्राप्नुमः। कवीनां कृतिषु तात्कालिक्या युगचेतनाया अभिव्यक्तिर्भवति, सा चाभिव्यक्तिः कविप्रतिभानुसारेण भिन्नस्वरूपा भवितुमर्हति।

यदा काव्यपरम्परायां कापि प्रवृत्तिर्युगजीवनस्य युगसंस्कृतीनां चाभिव्यञ्जनेऽसामर्थ्यं भजते, तदा तामेव प्रवृत्तिमाधृत्य साहित्यपरिधौ नूतना प्रवृत्तिर्जनिं लभते। संस्कृतसाहित्यस्य नाट्यपरम्परायाः परीक्षणेऽपि तथाविधा युगसापेक्षा अनेकाः प्रवृत्तयो विलोकयितुं शक्यन्ते। प्रवृत्तीनां परिवर्तनेऽपि संस्कृतनाट्यपरम्पराऽक्षुण्णाऽदृश्यतेति संस्कृतसाहित्ये नाट्यसाहित्यं सुदृढं विलोक्यते। साहित्ये कापि प्रवृत्तिर्विलुप्तैव न जायते, अपि तु पुरातनी प्रवृत्तिर्नूतनप्रवृत्त्या सहैव सततं प्रचलति (पाण्डेय, ई. १९७४, पृ. १२२)। नाट्यपरम्परायां भारविः कालिदासप्रवृत्तिं यथायथं पालयामास परं मुद्राराक्षसे विशाखदत्तः प्राक्तनप्रवृत्तिमेवाधृत्य नवीनप्रवृत्तेर्बीजाधानं चकार। शूद्रकोऽपि मृच्छकटिके परम्परां किञ्चिदतिरिच्य नाट्ये नूतनताऽऽधानस्यायासं विदधौ। एवं संस्कृतनाट्यपरम्पराऽद्य यावदक्षुण्णा वरीवर्ति।

संस्कृतनाट्यपरम्परा कदाऽऽरब्धा ? अस्य प्रश्नस्योत्तरं वस्तुगतरूपेण प्रदातुं न शक्यते । प्रो. डोनाल्ड क्लाइब स्टुअर्टनाम्नः पाश्चात्त्यविदुषो विचारे मानवसमाजे नाट्यकलायाः समुत्पत्तिस्तस्मिन्नेव दिने बभूब, यदा क्रीडारतः कोऽपि बालको निजमन्यत्वेन रूपयाञ्चकार (पाण्डेय, ई.१९७४, पृ. १२२) । कीर्तिशुक्लाया अनुसारेण विश्ववाङ्मये नाट्योत्पत्तिः कदा कथं च बभूवेति प्रश्नो हिरण्यगर्भाज्जगदुत्पत्तेः प्रश्न इवानिर्वचनीय एवास्ति (शुक्ला, ई.२००४, पृ. १) । संस्कृतनाट्योत्पत्तेः कालस्य विषये पौरस्त्याः पाश्चात्त्याश्च विद्वांसोऽनुसन्धानरता वर्तन्ते । पुष्टानां प्रमाणानामभावे सर्वैः स्वानुसन्धानमाधृत्य स्वाभिमतानि मतानि प्रस्तुतानि सन्ति, स्वमतस्य च तैः सत्यसन्निहितत्वं चोपस्थापितं विद्यते । नाट्यविषये नाट्यशास्त्रस्यैव प्रामाणिकत्वात् प्रथमं नाट्यशस्त्रमेवाधृत्य नाट्योत्पत्तिः समीक्ष्यते । आचार्यस्य भरतस्यानुसारेण सकलशास्त्रार्थसमन्वितस्य, सकलानामपि शिल्पानां प्रवर्तकस्य च सेतिहासस्य पञ्चमवेदरूपस्य नाट्यस्यारम्भो भगवता ब्रह्मणा विहितः । ब्रह्मोक्तिमुद्धृत्य कथितमस्ति भरतेन-

सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रवर्तकम् ।
नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम् ॥ (नाट्यशास्त्रम्, १/१५)
नाट्यप्रवर्तने भगवान् ब्रह्मा वेदेभ्यः सारं सञ्जग्राहेति भरतमुनिकथनमेवंविधमस्ति-
जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानाथर्वणादपि ॥ (नाट्यशास्त्रम्, १/१७)

सत्ययुगे मनोविनोदसाधनानामावश्यकता नासीत्, त्रेतायुगे देवा मनोविनोदसाधनानामावश्यकत्वमनुभूय तदर्थं ब्रह्माणं प्रार्थयामासुः । देवानां प्रार्थनया ब्रह्मा चतुर्भ्य एव वेदेभ्यः सारं सङ्गृह्य पञ्चमवेदत्वेन नाट्यवेदं चकार (शुक्ला, ई.२००४, पृ. १८) ।

संस्कृतवाङ्मयस्य मूलं वेद एवास्ति, अस्माकं सर्वविधानामपि दर्शनानां स्रोतोऽपि वेद एव । अतो नाट्यस्य मूलमपि वेदमन्तरा नान्यत्र भवितुमर्हतीति मे विचारः । वेदोल्लिखितस्याभिनीतस्य नाट्यस्य विषये विदुषां मतवैविध्यं दृश्यते परं नाट्यस्य उत्पत्तेरारभ्य विकासपर्यन्ता व्यवस्था वेदेषूपलभ्यते । वयं संहितासु, ब्राह्मणेषु, आरण्यकेषु, उपनिषत्सु च नाट्यबीजं द्रष्टुं शक्नुमः ।

वैदिककालेऽपि नाट्यस्य प्रधानानामङ्गानां संवाद-सङ्गीत-नृत्याभिनयादीनां प्रचलनमासीदिति वैदिकवाङ्मयस्याध्ययनेन ज्ञातुं पार्यते । प्रथमतो वैदिककाले नृत्यस्य वर्तमानता निरूप्यते । ऋग्वेदे उषोवर्णने उषस औपम्ये काचिन्नर्तकी एवमुपस्थापिता वर्तते-

अधिपेशांसि वपते नृतूरिवापोर्णुते वक्ष उस्रेव बर्जहम् । (ऋग्वेदः, १/९२/४)

अत्र नर्तक्याः सन्दर्भेण वैदिककाले नृत्यस्य वर्तमानता सूचिता विद्यते । एवं सोमयागसन्दर्भे सोमलताया रसान् निष्कासयितुमुपयुज्यमानस्याश्मनः कम्पः कृष्णमृगस्य नर्तनमिव भवतीति ऋग्वेदोक्तिरेवंविधाऽस्ति-

पर्णा वाचमक्रतोऽपद्यव्याखरे कृष्णा इषिरा अनर्तिषुः । (ऋग्वेदः, १०/९४/५)

अत्रापि मृगस्य नर्तनप्रसङ्गो वैदिककाले नृत्यस्य सत्तां सूचयति । एवं च पुनरश्मकम्पस्यैवौपम्यमङ्गुलीनर्तनेन सह प्रदर्शितमस्ति ऋग्वेदे-

संरभ्य धीराः स्वसृभिरनर्तिषुराघोषयन्तः पृथिवीमुपब्दिभिः । (ऋग्वेदः, १०/९४/४)

अत्र चाङ्गुलीनां नर्तनं वैदिके समये नृत्यास्तित्वं द्योतयद् दृश्यते ।

नृत्ये दीर्घायुष्यस्य कारणत्वं निक्षिपता ऋग्वेदेन पुनर्ऋग्वेदकालस्य नृत्यसत्तैवं निरूपिता विद्यते-

प्राञ्चो अगाम नृतये हसाय द्राघीय आयुः प्रतरं दधानाः । (ऋग्वेदः, १०/१८/३)

वैदिककाले नृत्यगीतयोर्विद्यमानत्वमथर्ववेदस्य पृथिवीसूक्ते वर्तमानो भूमावेव जनानां नर्तनस्य गानस्य च प्रसङ्ग एवं निरूपयति-

यस्यां गायन्ति नृत्यन्ति भूम्यां मर्त्या व्ये लबाः । (अथर्ववेदः, १२/१/४१)

वैदिकेषु सूक्तेषु यत् कथोपकथनं दृश्यते, तद् ऋग्वेदे संवादतत्त्वस्य वर्तमानत्वं सूचयति (पाण्डेय, ई.१९७४, पृ १२२) । ऋग्वेदस्य पञ्चदशसु सूक्तेषु संवादतत्त्वं लभ्यते (शुक्ला, ई.२००४, पृ. १८) । यमयमीसंवादः, पुरुरवउर्वशीसंवादः, इन्द्रमरुत्संवादः, विश्वामित्रनदीसंवादः, इन्द्रेन्द्राणीवृषाकपिसंवादः, सरमापणिःसंवादः, अगस्त्यलोपामुद्रासंवाद इत्याद्याः संवादास्तेषु प्रामुख्यं भजन्ते (द्विवेदी, ई.१९९५, पृ. २७०) । एषां संवादानामाधारेण म्याक्समूलरः, सिलबेन लेबी इत्यादयो विद्वांस ऋग्वेदेऽभिनयततत्त्वस्य विद्यमानत्वं सूचयन्ति (शुक्ला, ई.२००४, पृ. १८) । यद्यपि ऋग्वेदेऽभिनेयस्य नाट्यस्य चर्चा नास्ति, तथापि ऋग्वेदकालिका जना नाट्यस्य मनोरमैरंशैः परिचिता आसन्निति ऋग्वेदस्य संवादाभिनयतत्त्वयोराधारेणानुमातुं शक्यते (द्विवेदी, ई.१९९५, पृ. २७०) । नृत्यगीतसङ्गीतादीनां प्रारम्भिकावस्थाऽदिमे समाजेऽपि विद्यमानाऽऽसीदिति नृवंशविद्याया अध्ययनेनापि ज्ञायते । सिलबेन लेबीमहोदयस्यानुसारेण वैदिकसाहित्ये विद्यमाना गेयाः संवादा एव संस्कृतनाट्यसाहित्यस्य मूलत्वं वहन्ति (शुक्ला, ई.२००४, पृ. १८) । तथाविधं संवादतत्त्वमाधृत्यैव कविषु नाट्यरचनाप्रवृत्तिर्जागृता भवेत् ।

आर्थर बेरिडेल कीथनामा पाश्चात्त्यो विद्वान् संस्कृतनाट्यपरम्पराया अनुसन्धाता वर्तते । तदनुसारेण ऋग्वेदे कानिचित् कर्मकाण्डसम्बद्धानि तथाविधानि सूक्तानि विद्यन्ते येषामनुष्ठाने नाट्यतत्त्वानि सन्दृश्यन्ते । तदा याज्ञिकानुष्ठाने केवलं मन्त्रगानस्य स्तुतिपाठस्य च प्रयोग एव न भवति स्म, अपि तु तत्र केचिन्मनोहारिणः संवादा अपि साभिनयं जायन्ते स्म । अग्निष्टोमयागे सोमयागे सोमविक्रयस्य प्रसङ्गोऽभिनीयते । कीथानुसारेण तत्र सोमविक्रेता सोमविक्रयणायागच्छति, यजमानेन पुरोहितेन वा सह वादे वादे मूल्यनिश्चयो विधीयते, सोमग्रहणानन्तरं स विक्रेता मूल्यप्रदानेन विनैव परिधाव्यते । संवादस्य नाट्यस्वरूपप्रदानाय वस्तुतोऽध्वर्युरेव स्वीयं कमपि जनं सोमविक्रेतृरूपेण तत्र प्रेषयति, संवादस्य रोचकत्वाय वादविवादो विधीयते, कलहश्चोपस्थाप्यते । सर्वमेतदनुकरणं प्रहसनाय प्रस्तूयते, पूर्वमनुष्ठाने सम्मिलितानां मनोविनोदाय एतादृशं प्रहसनं विहितं स्यात्, पश्चाच्च यागानुष्ठानस्य विधावेवेदं समाविष्टं भवेत् (द्विवेदी, ई.१९९५, पृ. २७२) । यज्ञे ऋग्वेदविहितस्य

सोमविक्रयाभिनयस्यानुष्ठानं विधीयते स्मेति कीर्तिशुक्लाऽप्युद्धृतवती विद्यते (शुक्ला, ई.२००४, पृ. १९) । कात्यायनश्रौतसूत्रेऽपि सोमपानावसरे विहितस्यैकस्य लघ्वभिनयस्य चर्चा दृश्यते (पाण्डेय, ई.१९७४, पृ १२३)

महाव्रतं वैदिककर्मकाण्डस्य महत्त्वपूर्णमनुष्ठानमस्ति । कीथकथनमेवाधृत्योच्यते चेच्छीतकाले सूर्यस्य शक्तिसम्पन्नतायै इदमनुष्ठानमनुष्ठीयते। अत्र शीतस्य ग्रीष्मस्य च परस्परं सङ्घर्षो जायते। तत्र शीतस्य प्रतिनिधित्वं कृष्णवर्णः शूद्रो विदधाति चेत् ग्रीष्मस्य प्रतिनिधित्वं गौरवर्णो वैश्यः करोति (द्विवेदी, ई.१९९५, पृ. २७२)। अस्मिन्ननुष्ठाने नाट्ये इव नाट्यतत्त्वान्युपलभ्यन्ते। कीथानुसारेण महाव्रते एव पुंश्चलीब्रह्मचारिणोर्लोकप्रियमुपाख्यानमनुष्ठीयते। तत्र पुंश्चलीब्रह्मचारिणोः परस्परमारोपप्रत्यारोपौ विधीयेते, परस्परमाक्षिपन्तौ तौ गालीवाक्यं प्रयुङ्क्तः (द्विवेदी, ई.१९९५, पृ. २७२) । पुंश्चल्यादीनामनुकरणेनात्र जनसम्मर्दस्य मनोविनोदायासो विधीयते। अत्राप्यभिनयतत्त्वस्य संवादतत्त्वस्य च सर्वथा प्रयोगः समवाप्यते।। सङ्गीततत्त्वस्य पर्याप्तता तु सामवेदे विलोक्यत एव। एवं समेषामपि नाट्यतत्त्वानां प्रायेण वेदमूलत्वमेव सिद्ध्यति।

कीथानुसारेण इमे वैदिकसंवादा कर्मकाण्डसम्बद्धा संवादा वा नाट्यतां न भजन्ते, अपि त्वेतानि पौरोहित्यविशिष्टान्येव सन्ति। नाट्यस्यानुकरणमूलत्वादत्र चानुकरणस्य प्रायेण प्रयोगशून्यत्वादस्मिन् नाट्यतारोपो युक्तिमान् न सङ्गच्छते। अत एषु संवादेषु नाट्यबीजस्य वर्तमानत्वं यद्यपि स्वीक्रियते, तथाप्येतेषामेव नाट्यास्यादिरूपत्वं स्वीकर्तुं न शक्यते (द्विवेदी, ई.१९९५,, पृ. २७२)। कीथाख्यो विद्वांस्तु ऋग्वेदसंवादानां गेयत्वं च खण्डितवानस्ति, तदनुसारेण यज्ञे गेयत्वाय तु सामवेदमन्त्रा एवालं नितराम् (शुक्ला, ई.२००४, पृ. १९)। कीथानुसारेण नाट्यं तु यज्ञ एवास्ति, यज्ञस्येव नाट्यस्यापि प्रयोजनं प्रयोग एव विद्यते, संवाद आख्यानं वर्तते। यद्यपि संवादसूक्तेऽभिनेयत्वाच्छंसनमात्राया आधिक्यमस्ति, तथापि वेदेषु नाट्यबीजान्वेषणं तु युक्तिमदेवास्ति (शुक्ला, ई.२००४, पृ. २०)। विन्टरनित्साख्योऽध्येताऽपि कीथमतसमर्थनं कुर्वन् निगदितवान् वर्तते- 'संवादसूक्तेषु नाट्यत्वं नास्ति, अपि तु ते संवादा नाट्यस्य द्वितीयस्वरूपत्वं भजन्ते' इति (शुक्ला, ई.२००४, पृ. २१)।

म्याक्समूलरोऽपि संस्कृतनाट्यानां मूलं वेदेषूपलब्धानां संवादेषु कर्मकाण्डस्य मन्त्रेषु च निक्षिप्तवान् वर्तते (पाण्डेय, ई.१९७४, पृ. १२३)। ऋग्वेदस्येन्द्रमरुत्सूक्तस्य व्याख्यानं कुर्वता तेन नाट्योत्पत्तेराधारत्वं वैदिककर्मकाण्डेषु निक्षिप्तमस्ति (शुक्ला, ई.२००४, पृ. २०)। इन्द्रमरुत्सूक्तस्य प्रसङ्गे कतिपये जना इन्द्रस्य कतिपये च पुनर्मरुतस्तदनुयायिनां स्वरूपधारणं कृतवन्तो भवेयुस्तेनाभिनयपरम्परा प्रारब्धा स्यादिति म्याक्समूलराभिव्यक्तिर्वर्तते (द्विवेदी, ई.१९९५, पृ. २७०) । डा. म्याक्डोनलमहोदयस्यानुसारेण संस्कृतनाट्यसाहित्यस्य प्रारम्भिकं स्वरूपमृग्वेदस्य तेषु स्तोत्रेषु लभ्यते, यत्र संवादतत्त्वं विलसति । पुरुरवउर्वशीसंवादस्तु वस्तुत एव नियमितनाटकस्याधारो मन्यते । सूक्तकालात् सहस्रवर्षेभ्योऽनन्तरं तत्सूक्तं कालिदासेन विक्रमोर्वशीयनाम्ना नाट्यरूपान्तरणं विहितम् (पाण्डेय, ई.१९७४, पृ. १२३)। सिलबेन लेबीमहोदयस्यानुसारेण ऋग्वेदे तथाविधाः प्रसङ्गाः सन्ति, यत्र सुवेषाणां रमणीनां नृत्यं तद्द्वारा रसिकानामाकर्षणं च वर्णितमस्ति (द्विवेदी, ई.१९९५, पृ. २७०)। एस एन गुप्तः, एस के दे चेति द्वौ विद्वांसौ वेदमन्त्रेषु नाट्यतत्त्वस्य विद्यमानत्वं स्वीकृतवन्तौ वर्तेते। तयोरनुसारेण तस्मिन् काले प्रचलितानां धार्मिकसङ्गीतानां तत्सम्बद्धनृत्यानां च नाटकेन सह सम्बन्धः सुनिश्चितो दृश्यते (पाण्डेय, ई.१९७४, पृ. १२३) । ओल्डेनवर्गोऽपि धार्मिकनृत्यमेव नाट्योद्गमस्यादिमं बीजं मनुते । तदनुसारेण साङ्गिकाभिनयं नृत्यं

प्रथमतो गीतेन तदनु च संवादेन सम्बद्धं स्यात् (द्विवेदी, ई.१९९५, पृ. २७४)। वैदिककाले व्यावसायिकरूपेण शैलूषजातीया जना गानं सूतजातीयाश्च नृत्यं कुर्वन्तो नृत्यगीतद्वारा नाट्याभिनयं विदधति स्मेति शुक्लयजुर्वेदाभिव्यक्तिरेवं वर्तते-

ॐ नृत्ताय सूतं गीताय शैलूषं धर्माय सभाचरं नरिष्ठायै भीमलं नर्माय रेभ६ँहसाय कारिमानन्दाय स्त्रीषखं प्रमदे कुमारीपुत्रं मेधायै रथकारं धैर्याय तक्षाणम् (शुक्लयजुर्वेदः, ३०/६)।

सूताः शैलूषाश्च नृत्याभिनयसंयोगेन नाट्याभिनयं कुर्वन्ति स्म । तैत्तिरीयब्राह्मणे सूतमागधशैलूषादीनां प्रसङ्गा आगच्छन्ति (पाण्डेय, ई.१९७४, पृ. १२४) । शैलूषादयो नाट्यनियमानां ज्ञातारो नासन्, वैदिकमन्त्रेषु कुत्रापि नाट्यस्य पारिभाषिकशब्दानां परभाषादिना वर्णनं नास्ति, अतः शैलूषादीनां प्रसङ्गेन वेदस्य नाट्यमूलत्वं प्रमाणयितुं न शक्यत इति एस एन दासगुप्तस्याभिमतिरस्ति । तदनुसारेण नाटकीयैर्धार्मिकोत्सवैः सह नाट्यकलाया ईषत्सम्बन्धस्तु वर्तते, परं सा गर्भस्था शिशुरिव प्राकट्यहीनाऽस्ति (शुक्लयजुर्वेदः, पृ. १२४)।

फौन श्रोडरमहोदयस्यानुसारेण प्राचीनकाले नृत्यगीतवाद्यानां सहान्वितिरासीत्, तत्प्रभावेणैव महर्षयो वैदिकमन्त्रान्तर्वर्तमानानां संवादानां गायनं नर्तनमभिनयं च प्रारेभिरे (शुक्ला, ई.२००४, पृ. २०) । तदनुसारेण सोमसूक्त-मण्डूकसूक्तादीनि कानिचिद् वैदिकानि संवादसूक्तानि एकालापमयानि रहस्यसूचकानि स्वगतकथनानि सन्ति चेत् कानिचित् सृष्टिप्रक्रियाया अनुकरणं कुर्वन्ति रहस्यमयानि रूपकाण्येव सन्ति । यमयमीसंवादः, इन्द्रेन्द्राणीवृषाकपिसंवादः, अगस्त्यलोपामुद्रासंवादश्चैतादृशानि सूक्तानि तु सर्वथा रूपकेषु परिणतानि भवन्ति (द्विवेदी, ई.१९९५, पृ. २७१)। वैदिकानि संवादात्मकसूक्तानि गीयन्ते स्म । संवादकर्त्रोर्भेदाकलनासम्भवात् संवादसूक्तस्य गानमेकेनैव गायकेन तु न सम्भवति, अतस्तादृशानां सूक्तानां गानं प्रतिपात्रं भिन्नेन गायकेन विधीयते स्म, येन संवादसूक्तेषु नाट्यतत्त्वविलसनं युक्तियुक्तमेव प्रतिभातीति डा. हर्टलमहोदयस्याभिव्यक्तिरस्ति (शुक्ला, ई.२००४, पृ. २०) । सततं गेयत्वाद् वैदिकाः संवादसूक्ता रहस्यात्मका अभिनयाः सन्तीति हर्टलविचारो वर्तते (द्विवेदी, ई.१९९५, पृ. २७१)। सामवेदस्य मन्त्रान् पुरुषा वाद्यगतिमाधृत्य नृत्यन्तो गायन्ति स्मेति अथर्ववेदोक्तिर्वर्तते (अथर्ववेदः ७/१/४०)। एतेन वैदिककाले ऋत्विजो देवलोकस्य घटनानां प्रस्तुत्यै देवानामनुकरणेन नाट्यप्रदर्शनं कुर्वन्ति स्मेति ज्ञायते (द्विवेदी, ई.१९९५, पृ. २७१) । ओल्डेनवर्गादीनां विदुषामनुसारेण संवादसूक्तानां गद्यपद्यमयत्वान्नाट्यसाहित्येऽपि प्रायेण गद्यपद्यमय्या भाषायाः प्रयोगः प्राप्यते (द्विवेदी, ई.१९९५, पृ. २७२)। अतो नाट्यकलायाः प्रारम्भिक आधारोऽयमेवास्ति, इममेवाधृत्य नाट्यकला विकसिताऽभवदिति विदुषां विचारो युक्तिमानेव प्रतिभाति।

वैदिकानां संवादसूक्तानामध्ययनानन्तरं ज्ञायते यन्नाट्यं वेदमूलमेवास्ति । यद्यपि संवादसूक्तेष्वभिनेयताया नैयून्यं दृश्यते, तथापि तत्र वर्तमानानां संवादतत्त्वानां कथोपकथनानां चाधारेण नाट्यस्य प्रारम्भिक आधारो वेदेष्वेवासीदिति निश्चप्रचं वक्तुं शक्यते। यद्यपि तत्राङ्गिकाभिनयः प्रायेण न समाविश्यते, तथापि वाचिकाभिनयेन न्यूनमात्रायामेवापि रसाभिव्यञ्जनात् तत्र संवादसूक्तेषु नाट्यबीजं द्रष्टुं शक्यते। पुनः संवादसूक्तस्य प्रसङ्गैर्जनानां मनसि यथाविषयं शान्तादिरसास्त्वभिव्यज्यन्त एव । कर्मकाण्डसम्बद्धेषु पौरोहित्यकर्मसु तु ऋत्विजो वाचा सहाङ्गान्यपि चालयन्त्येव । कीथनिर्दिष्टे सोमविक्रयणप्रसङ्गे,

पुंश्चलीब्रह्मचारिणोः प्रसङ्गे च वाचिकाङ्गिकयोर्द्वयोरेवाभिनययोः सम्यक् प्रयोगः समवाप्यते। अतो नाट्यानां वेदमूलत्वं न शङ्कनीयमिति मे मतिरस्ति।

**रामायणादिषु नाट्यप्रसङ्गः**

नाट्यस्योत्पत्ती रामायणमहाभारतादीनां कालात् पूर्वमेव जातेति तत्र रामायणमहाभारतादौ प्रयुक्तानां नाट्यसम्बद्धशब्दानां तत्प्रसङ्गानां चाधारेण वक्तुं पार्यते । तत्रस्थानां नाट्यसम्बद्धप्रसङ्गानामाधारेण तस्मिन् काले नाट्यकलायाः सम्पन्नता चानुभूयते। न केवलं नाट्यप्रयोग एव, अपि तु नाट्यसिद्धान्तानां विषये विमर्शश्च च तस्मिन् काले सञ्जातः स्यादिति रामायणमहाभारतादीनां सोहापोहं विमर्शेनानुभूयते। रामायणे गीतनृत्यादीनां प्रसङ्ग एवमुपस्थापितो वर्तते-

महार्हाणि च पानानि शयनान्यासनानि च।

गीतं नृत्यं च वाद्यं च लभ मां प्राप्य मैथिलि॥ (रामायणम्, ५/११/२०)

एवं तत्र रामायणे नृत्त-लास्यशब्दयोश्च यथाप्रसङ्गं प्रयोगोऽवाप्यते, नट-नर्तक-शैलूषादीनामनभिनेतॄणां वर्णनं च तत्र यथाप्रसङ्गं विहितमस्ति (पाण्डेय, ई.१९७४, पृ. १२४)। नटनर्तकशब्दयोः प्रयोगस्तु तत्रैवं समवाप्यते-

नाराजके जनपदे प्रहृष्टनटनर्तकाः।

उत्सवाश्च समाजाश्च वर्धन्ते राष्ट्रवर्धनाः॥ (रामायणम्, २/५१/१३)

रामायणस्य बालकाण्डे पुत्रार्थं यष्टुकामस्य दशरथस्य विज्ञापनानन्तरं वसिष्ठो शास्त्रविद्भिः साकं यज्ञार्थं नटनर्तकादींश्चानुरुद्धवान् वर्तते। स प्रसङ्गो रामायणे एवमुपस्थापितोऽस्ति-

गणकान् शिल्पिनश्चैव तथैव नटनर्तकान्।

तथा शुचीन् शास्त्रविदः पुरुषान् स बहुश्रुतान्॥ (रामायणम्, १/१२/७)

अनेन रामायणकाले नटनर्तकादीनां च शास्त्रवित्तुल्यगौरवमासीदित्यनुमातुं शक्यते।

वाल्मीकिर्ब्रह्मणोऽनुग्रहेण रामायणं विरच्य तद्गानार्थं कुशलवौ आदिष्टवानासीत्। तयोर्गानं प्रशंसता वाल्मीकिना नाट्यरसानां नामोल्लेखनपूर्वकं पुनरुक्तमस्ति-

हास्यशृङ्गारकारुण्यरौद्रवीरभयानकैः।

बीभत्सादिरसैर्युक्तं काव्यमेतदगायताम्॥

तौ तु गान्धर्वतत्त्वज्ञौ स्थानमूर्च्छनकोविदौ।

भ्रातरौ स्वरसम्पन्नौ गान्धर्ववेदरूपिणौ।

रूपलक्षणसम्पन्नौ मधुरस्वरभाषिणौ ॥ (रामायणम्, १/४/९-११)

रामायणकालेऽयोध्यायां कलासङ्घानां नाट्यसङ्घानां चास्तित्वमासीदिति रामायणनिर्देश एवंविधो वर्तते-

नटनर्तकसङ्घानां गायकानां च गायताम्।

मनःकर्णसुखा वाचः शुश्राव जनता ततः ॥ (रामायणम्, २/६/१४)

वधूनाटकसङ्घैश्च संयुक्तां सर्वतः पुरीम्। (रामायणम्, १/५/१२)

रामायणानुसारेण रामायणकाले नृत्यगीतादीनां प्रचलनमेव न, अपि तु नाटकादीनामभिनयोऽपि सञ्जायते स्म-

वादयन्ति तथा शान्तिं लासयन्त्यपि चापरे।

नाटकान्यपरे प्राहुर्हास्यानि विविधानि च ॥ (रामायणम्, २/६३/४)

एवं विविधैः साक्ष्यै रामायणकाले नाट्यकलाया विकासो नितरां जात इति सङ्केतः समवाप्यते। रामायणे प्रयुक्तानां नाट्यसिद्धान्तसम्बद्धानां शब्दानामाधारेण तु रामायणकाले नाट्यसिद्धान्तस्य च विकासः सञ्जात आसीदिति ज्ञायते।

महाभारतेऽपि नाटक-नट-नर्तक-सूत्रधारादिशब्दानां प्रयोगः प्राप्यते । नटनर्तकगायकशब्दानां प्रयोगो महाभारते एकत्रैवं विहितोऽस्ति-

आनर्ताश्च तथा सर्वे नटनर्तकगायकाः।

बहिर्विवासिताः सर्वे रक्षद्भिर्वित्तसञ्चयान् ॥ (महाभारतम्, ३/१५/१४)

नृत्तशब्दश्चेन्द्रमुखान्महाभारते एवं प्रयुक्तो विद्यते-

नृत्तं गीतं च कौन्तेय चित्रसेनादवाप्नुहि।

वादित्रं देवविहितं नृलोके यन्न विद्यते।

तदर्जयस्व कौन्तेय श्रेयो वै ते भविष्यति ॥ (महाभारतम्, ३/४५/६-७)

सूत्रधारशब्दस्य प्रयोगोऽपि महाभारते एवं विहितो वर्तते

स्थपतिर्बुद्धिसम्पन्नो वास्तुविद्याविशारदः।

इत्यब्रवीत् सूत्रधारः सूतः पौराणिकस्तथा ॥ (महाभारतम्, ६/११६/४)

अर्जुनस्य स्वर्गप्राप्तेरवसरेऽप्सरसां नृत्यप्रसङ्गो महाभारते एवं निर्दिष्टो वर्तते-

घृताची मेनका रम्भा पूर्वचित्तिः स्वयम्प्रभा।

उर्वशी मिश्रकेशी च डुण्डुर्गौरी वरूथिनी।

गोपली सहजन्या च कुम्भयोनिः प्रजागरा।

चित्रसेना चित्रलेखा सहा च मधुरस्वरा।

एताश्चान्याश्च ननृतुस्तत्र तत्र वराङ्गनाः।

चित्तप्रमथने युक्ताः सिद्धानां पद्मलोचनाः॥ (महाभारतम्, ३/४४/२९-३१)

गुप्तवासकालेऽर्जुनो नृत्यप्रशिक्षणं प्रतिजानन् कथयति-

गीतं नृत्यं विचित्रं च वादित्रं विविधं तथा।

शिक्षयिष्याम्यहं राजन् विराटभवने स्त्रियः॥ (महाभारतम्, ४/२/२४)

प्रेक्षागारस्योल्लेखो महाभारतेऽनेकत्र परिदृश्यते। कुमाराणां धनुर्विद्याप्रदर्शनार्थं धृतराष्ट्रेणैको महान् प्रेक्षागारो निर्मित आसीत्। अस्त्रविद्यायाः प्रदर्शनमचतिरिच्य तत्र नाट्यादीनां प्रदर्शनमपि सञ्जायते स्म। राजकुमाराणामुपस्थितेः प्राक् तत्र नटनर्तकादीनामुपस्थित्या तत्र नृत्यगीतवादित्रादीनां प्रदर्शनं क्रियते स्म (शुक्ला, ई. २००४, पृ. २०)। विराटेन च मल्लविद्यायाः प्रदर्शनाय प्रेक्षागृहं व्यवस्थितमासीत्। पुरुषाणामेव न वृषमहिषादीनां च द्वन्द्वं तत्र समायोज्यते स्म। विराटेन विराटनगरे राजकुमारीणां कृते नर्तनशालायाश्च व्यवस्था विहिताऽऽसीत्, यत्र नर्तनमतिरिच्य नाट्यादीनां प्रदर्शनं च विधीयते स्म (शुक्ला, ई. २००४, पृ. २०)। महाभारतस्य द्रौपदीस्वयंवरप्रसङ्गे दमयन्तीस्वयंवरप्रसङ्गे च प्रेक्षागारस्योल्लेखो वर्तते। दमयन्तीस्वयंवरे निर्मितायाः प्रेक्षास्थल्या रङ्गमहारङ्गभेदेन द्वैविध्यं तस्याः पर्वतगुहया साकमौपम्यं च महाभारते निर्दिष्टमस्ति (शुक्ला, ई. २००४, पृ. २१)। द्रौपद्याः स्वयंवरावसरे बहूनि दिनानि यावत् समाजः सञ्चालितोऽभवत्। समाजस्तस्य कालस्य रङ्गमञ्चानुषक्तसङ्गठनमासीत्। समाजसञ्चालनाय तत्र रङ्गमञ्चं व्यवस्थितमवर्तत। तत्र सूत-मागध-नर्तक-वैतालिकैर्बहूनि दिनानि यावत् समाजः सञ्चालितः (शुक्ला, ई. २००४, पृ. २१)। महाभारते एवंविधा नाट्यप्रसङ्गा अनेके सन्ति। तैः प्रसङ्गैर्महाभारतकाले नाट्यकलाया उन्नतावस्था द्योत्यते।

महाभारतानन्तरं विविधेषु पुराणेषु च नाट्यप्रसङ्गा अनेकधा वर्णिताः सन्ति। ब्रह्मपुराणे रासक्रीडायाः सुव्यवस्थितं स्वरूपं दृश्यते चेद् विष्णुपुराणे, पद्मपुराणे, ब्रह्मवैवर्तपुराणे च रासक्रीडायाः सविस्तरं वर्णनं लभ्यते। श्रीमद्भागवतमहापुराणस्य रासपञ्चाध्याय्यां तु रासलीलायाः सर्वोत्कृष्टं स्वरूपं प्राप्यते (पाण्डेय, ई. १९७४, पृ. १२८)। तत्र गोपीभिर्विहितस्य श्रीकृष्णलीलानामभिनयस्य च प्रसङ्ग उपस्थापितो विद्यते। रासलीलया साकं छालिक्याभिनयश्च पौराणिककालस्य प्रमुखमवदानमस्ति। मालविकाग्निमित्रे महाकविना कालिदासेन च छलिकनाम्ना छालिक्याभिनयस्य प्रयोगो विहितोऽस्ति (पाण्डेय, ई. १९७४, पृ. १२८)। श्रीमद्भागवते भगवतः कृष्णस्य विशेषणत्वेन नटवरवपुःशब्दस्य प्रयोगोऽनेकत्र विहितमस्ति। तेषु भगवतः कृष्णस्य स्वरूपं प्रवर्णयतो व्यासस्योक्तिरत्र प्रस्तूयते-

बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारम्,

बिभ्रद्वासः कनककपिशं वैजयन्तीं च मालाम्।

रन्ध्रान् वेणोरधरसुधया पूरयन् गोपवृन्दैः,

वृन्दारण्यं स्वपदरमणं प्राविशद् गीतकीर्तिः ॥ (श्रीमद्भागवतम्, १०/२१/५)

पुराणादिषु नाट्यसम्बद्धानां विषयाणामनेकधाऽनेकत्र च प्रयोगः समवाप्यते। तत्प्रयोगस्य सर्वथात्रोदाहृतिरालेखस्य कायवृद्ध्यर्थमेव भवतीति न तथा विधीयते। एवं नाट्यप्रयोगदृशा पुराणानां समीक्षणे पौराणिककाले नाट्यविकासो बाहुल्येन सञ्जात आसीत्। एतेन नाट्योत्पत्तेः पुराणकालतः पश्चवर्तित्वं शङ्कमानानां विदुषां मुखपिधानं सञ्जायते।

पाणिनेरष्टाध्याय्यां 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः (अष्टाध्यायी, ७/३/११०)' 'कर्मन्दकृशाश्वादिनिः (अष्टाध्यायी, ४/३/१११) इति सूत्रद्वये नटसूत्रकृत्त्वेन शिलालिकृशाश्वयोर्ग्रहणं विहितमस्ति। तदुदाहरणे पुनर्नटानां शैलालित्वं कृशाश्वित्वं च निर्दिश्य वैयाकरणैः पाणिनिकाले नाट्यकर्तॄणां सम्प्रदायाश्च सङ्केतिता वर्तन्ते। शिलालिकृशाश्वयोर्ग्रन्थास्तु अद्यापि लभ्यन्त इति तयोः प्रामाणिकत्वे न सन्देहः। मौर्यकाले भारतवर्षे आजीविकायै एव नट-नर्तक-गायक-वादक-वाग्जीवन-कुशीलव-प्लवक-सौभिक-चारण-स्त्रीव्यवहाराश्च स्वप्रतिभां प्रदर्शयन्ति स्मेति कौटिल्यनिर्देशो ह्येवंविधो वर्तते- 'एतेन नटनर्तकगायकवादकवाग्जीवनकुशीलवप्लवकसौभिकचारयस्त्रीव्यवहारिणां स्त्रियो गूढाजीवाश्च व्याख्याताः (अर्थशास्त्रम्, २/२७/१८)' इति। तस्मिन् काले प्रतिसमूहं तेषां राजकरोऽपि यथायोग्यं सुनिश्चित आसीत् (अर्थशास्त्रम्, २/२७/१९-२०)। तात्कालिकः सर्वकार आसां नाट्यादिललितकलानां सप्रोत्साहनं तच्छिक्षणव्यवस्थां विदधाति स्म (अर्थशास्त्रम्, २/२७/२१)। कलाकाराणां कलायाः स्थानमुन्नतं स्यात्, पुनः कलायां तेषां स्वेच्छाचारिता च न स्यादिति धिया कौटिल्येनार्थशास्त्रे शिल्पिनां नियमनावसरे कलाकाराणां नियमनायासोऽपि विहितोऽस्ति (अर्थशास्त्रम्, ४/१/३१)।

जैनधर्मस्य समवायाङ्गसूत्राणां सूचौ नृत्य-गीत-वाद्यानां तालस्य च कलारूपेण परिगणनं विहितमस्ति, औत्पत्तिकसूत्रे च नाट्यशास्त्रस्य, तालस्य, वाद्यस्य च चर्चा दृश्यते (पाण्डेय, ई.१९७४, पृ. १२६)। बौद्धग्रन्थे विनयपिटके नाट्यकलाया बहुधा वर्णनाज्ज्ञायते यत् तस्मिन् काले नाट्यकलाया आभारतवर्षं प्रचार आसीदिति। अवदानशतकेऽपि नाट्यकलाया निर्देशो विद्यते। कीटगिरौ रङ्गशालायां नाट्याभिनयं द्रष्टुं यातौ अश्वजित्पुनर्वसुनामानौ भिक्षू नाटकपरिसमाप्तेरनन्तरं नर्तक्या सह प्रेमालापं कुर्वन्तौ अदृश्येताम्, अतो विहारात् तयोर्निष्कासनं जातमिति कथा विनयपिटकस्य चुल्लवर्गे वर्तते (पाण्डेय, ई.१९७४, पृ. १२६)। कामसूत्रे कुशीलवानां कलायाः प्रेक्षणस्य निर्देशो ह्येवं विहितोऽस्ति- 'कुशीलवाश्चागन्तवः प्रेक्षणकमेषां दद्युः (कामसूत्रम्, १/४/२८)। पुनस्तेषां पूजायाः, सश्रद्धं दर्शनस्य चावश्यकार्यता, व्यसनोत्सवेषु तेषां स्वीकार्यता च कामसूत्रे निर्दिष्टा वर्तते (कामसूत्रम्, १/४/२९-३१)। महावीरस्वामिनो जीवनचरितस्य नृत्यप्रधाने नाट्येऽभिनयो विहित इति राजप्रश्नीयागमग्रन्थमाधृत्य ज्ञातुं शक्यते (पाण्डेय, ई.१९७४, पृ. १२६)। सूत्रकाले भारतवर्षे नाटकस्याधिक्येन लोकप्रियत्वं तस्य संस्कृतेः सामाजिकजीवनस्य चावयवत्वं सम्पन्नमासीत्। वात्स्यायनानुसारेण सरस्वतीभवने पाक्षिकरूपेण मासिकरूपेण वा प्रसिद्धपर्वावसरेषु राजनियुक्ता नटा अभिनयं कुर्वन्ति स्म, तस्मिन् कालेऽस्याभिनयस्य समाजनाम्ना प्रसिद्धिरासीत्। उक्तं च- 'पक्षस्य मासस्य वा प्रख्यातेऽहनि सरस्वत्या भवने

नियुक्तानां नित्यं समाजः (कामसूत्रम्, १/४/२७)। तस्मिन् कालेऽभ्यागतानां स्वागतार्थं नृत्य-सङ्गीतादीनां कलानां गोष्ठी अपरिहार्या आसीदिति कामसूत्रोक्तिरेवं वर्तते-

ताम्बूलानि स्रजश्चैव संस्कृतं चानुलेपनम्।

आगतस्याहरेत् प्रीत्या कालगोष्ठीश्च योजयेत्॥ (कामसूत्रम्, ६/१/२९)

पतञ्जलेर्महाभाष्ये कंसवध-बलिबन्धाख्ययोर्द्वयोर्नाटकयोः प्रसङ्ग उपवर्णितो विद्यते, तत्र नाट्यकलायाः, नटनटीनाम्, नर्तकनर्तकीनाम्, रङ्गमञ्चस्य, नाट्याभिनयस्य चोपादानमस्ति। पतञ्जलेः काले नटाः केवलं नृत्यमेव न कुर्वन्ति स्म, अपि तु ते सङ्गीतस्याभिनयस्य च माध्यमेन घटनानां प्रदर्शनं कुर्वन्ति स्मेति महाभाष्योक्तयोर्द्वयोर्नाटकयोराधारेण कीथमहोदयस्य निष्कर्षो वर्तते। एवं प्राचीनकाले प्रयुक्तानां नाट्याङ्गानामवस्थां प्रदर्शितवानपि कीथमहोदयः पौरस्त्यनाट्यस्याद्यं स्वरूपमीशवीयाब्दारम्भतः शतद्वयवर्षेभ्यः प्राक्कालिकं न मनुते (पाण्डेय, ई.१९७४, पृ. १२७)।

ईशवीयाब्दारम्भतोऽपि शतकपञ्चवर्षेभ्यः पूर्वमेवाचार्येण भरतेन विरचिते नाट्यशास्त्रे नाट्यकलायाः सोहापोहं स्वरूपं प्रस्तुतमस्तीति पौरस्त्या नाट्यकला प्राचीनकाले एव सुष्ठु विकसिता दरीदृश्यते। नाट्यशास्त्रं पाणिनिकालाच्छतद्वयवर्षेभ्योऽनन्तरं विरचितमित्यत्र तु विदुषां प्रायेण समेषां सम्मतिरस्ति। कीथमहोदयः संस्कृतनाटकस्याद्यं स्वरूपमीशवीयाब्दारम्भतः शतद्वयवर्षेभ्यः प्राचीनं नास्तीति यन्निगदितवानस्ति, तस्य खण्डनं तु भरतकृतेन नाट्यशास्त्रेण स्वतो विहितो वर्तते। नाट्यशास्त्रानुसारेण तु त्रेतायुगे एव नाट्यशास्त्ररूपस्य पञ्चमवेदस्य प्रवर्तनं भगवता ब्रह्मणा विहितमस्ति-

पूर्वं कृतयुगे विप्रा वृत्ते स्वायम्भुवान्तरे।

त्रेतायुगे सम्प्रवृत्ते मनोर्वैवस्वतस्य तु॥ (नाट्यशास्त्रम्, १/८)

नाट्यशास्त्रानुसारेण ब्रह्मणः प्राप्तं नाट्यशास्त्रं स्वशिष्यान् प्रशिक्ष्य, स्त्रीपात्ररूपेण ब्रह्मण एवाप्सरसश्च प्राप्य भरतेनेन्द्रमखे नाट्याभिनयारम्भो व्यधायि (नाट्यशास्त्रम्, १/६४)। दानवैस्तत्र विघ्न उपस्थापितः (नाट्यशास्त्रम्, १/६५)। विघ्ने सम्प्राप्ते देवराजेन विघ्नशमनं विधाय विश्वकर्मा नाट्यगृहनिर्माणायादिष्टः (नाट्यशास्त्रम्, १/७९)। विश्वकर्मा च देवाराजादेशमनुसृत्य सर्वलक्षणसम्पन्नं नाट्यगृहं रचयामास (नाट्यशास्त्रम्, १/८०)। अत्र नाट्यशास्त्रे वर्णितस्य विश्वकर्मनिर्मितस्य नाट्यगृहस्य साम्यं तु आधुनिका नाट्यशाला अपि कर्तुं न पारयन्तीत्यहं मन्ये। तस्मिन् नाट्यगृहे ब्रह्मण आदेशेन सर्वप्रथमं भरतो ब्रह्मनिर्मितममृतमन्थननामा समवकारोऽभिनयेन प्रदर्शितः (नाट्यशास्त्रम्, ४/५-६)। शङ्करतोषये ब्रह्मादेशाद् भरतेन सपूर्वरङ्गं त्रिपुरदाहाख्यो डिमः प्रदर्शितः। नटराजस्य शङ्करस्यादेशतो भरतस्तण्डुना नृत्यशिक्षया शिक्षितः, पार्वत्या च शृङ्गारिकलास्यशिक्षा भरताय प्रदत्ता (पाण्डेय, ई.१९७४, पृ. १२८)। भगवता विष्णुना नाट्यवेदस्य प्रभावोत्पादकतायै चतसृणां नाट्यवृत्तीनां सृष्टिर्विहिता (पाण्डेय, ई.१९७४, पृ. १२९)। एतेषामेव नाट्याङ्गानाम्, वृत्तीनाम्, गानवाद्यादीनां साहाय्येन नाट्यकलायाः प्रयोगः प्रारब्धः (शुक्ला, ई.२००४, पृ. १९)।

उमया सह विवाहानन्तरं स्वाङ्गत एव नृत्योत्पत्तिं विहितवता शङ्करेण नृत्यस्य ताण्डवलास्यभेदाद् द्विधा विभागो विहितः । दक्षिणभागत उत्पन्नस्य नृत्यस्य ताण्डवमिति वामभागत उत्पन्नस्य नृत्यस्य चा लास्यमित्यभिधानं विधाय शङ्करस्ताण्डवं स्वस्मिन् लास्यं च पार्वत्यां निचिक्षेप । एतदुपस्थापयता कालिदासेनोदीरितमस्ति-

देवानामिदमामनन्ति मुनयः शान्तं क्रतुं चाक्षुषम्,

रुद्रणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा ।

त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते,

नाट्यं भिन्नरुचेर्जनस्य बहुधाऽप्येकं समाराधनम् ॥ (मालविकाग्निमित्रम्, १/४)

कालिदासस्येमामभिमतिमनुसृत्य नाट्यमूलताऽपि शङ्करनृत्ये स्थापयितुं शक्यते, यतो हि शङ्करो नटराजत्वेन विश्रुतोऽस्ति । तस्य नटराजता सृष्टेरानन्दरूपस्य प्रतीतिं कारयति, यतो हि सृष्टिचक्रमप्यानन्दरूपं वर्तते, नाट्यमप्यानन्दरूपं वर्तते । रसस्यानन्दपर्यायाद् नाट्यस्य च रससमुदायत्वादिदं सिद्ध्यति । अतो नाट्योत्पत्तौ शिवस्य दायित्वं शाश्वतं वर्तते । शिवो जनदेवता वर्तते, तेन जनरञ्जनाय शिवेन नाट्याविष्कारो विहित इति नितरां वक्तुं शक्यते (द्विवेदी, ई.१९९५, पृ. २७४) ।

भरतोक्तनाट्यशास्त्रस्य सम्यगध्ययनेन ज्ञायते यद् भरतस्य काले नाट्यकलासम्बद्धा नट-नटी-नृत्य-वाद्य-सङ्गीत-संवाद-वस्तु-रङ्गमञ्चादिविषयाः सावयवं निर्धारिता आसन् । नाट्यकलायाः प्रारूपं तु भरतकालतोऽपि बहोः कालात् पूर्वं प्रचलनेऽदृश्यत । भरतेन लोकप्रचलितायास्तस्या एव नाट्यकलाया व्यवस्थापनं विधाय तस्य शास्त्रीयं स्वरूपं निरधारि । तेन पूर्ववर्तिनां नाट्यग्रन्थानां समीक्षणेन नाट्यलक्षणादीनां निर्धारणं विहितमति निश्चप्रचम् । यद्यपि प्राक्कालिकानि नाट्यकलाया उदाहरणत्वेन कान्यपि मूलनाटकानि अद्य न लभ्यन्ते, तथापि एवंविधानां साक्ष्यानामाधारेण सम्यग् विचारे विहिते सति संस्कृतनाटकस्य परम्परा सुदीर्घा दृश्यते ।

रामायणस्य, महाभारतस्य, पुराणानाम्, कामसूत्रस्य, अर्थशास्त्रस्य, जैनसूत्रस्य, विनयपिटकस्य च प्रसङ्गा यद्यपि नाट्योत्पत्तितोऽपि नाट्यविकासेन सम्बद्धाः सन्ति, तथापि संस्कृतनाट्यस्य तेभ्यः पश्चवर्तित्वं प्रमाणयितुमुद्यतानां मतखण्डनाय तेऽपि प्रसङ्गा अत्रोपस्थापिता विद्यन्ते । एतेन रामायणादीनां कालतो बहुकालपूर्वमेव नाट्यस्योत्पत्तिः सञ्जाताऽऽसीदिति निश्चप्रचं वक्तुं शक्यते ।

**लोकसंस्कृतौ नाट्यप्रयोगः**

एस एन गुप्तः, एस के दे चेति द्वौ लोके प्रचलितानां धार्मिकसङ्गीतानां तत्सम्बद्धनृत्यानां च नाटकेन सह सम्बन्धं प्रदर्शितवन्तौ वर्तेते इति पूर्वमेवोक्तम् । ओल्डेनवर्गेनापि धार्मिकनृत्यस्य नाट्योद्गमस्यादिमबीजत्वं स्वीकृतमस्ति । एतदपि पूर्वमेवोपस्थापितम् । ओल्डेनवर्गस्याभिमतिं समर्थयतो म्याक्डोनलमहोदयस्यानुसारेण नृत्यमेव नाट्यस्य प्रारम्भिकं स्वरूपं वर्तते । तन्मते नट-नटी-नाट्य-नाटकादीनामाधारत्वं वहमानो नट्धातुर्नृत्धातोः प्राकृतं रूपमस्ति । अतो नाट्यं नृत्यमेव, नटो नर्तक एव, नटी तु नर्तकी एव । तदनुसारेण नृत्यमेव संस्कृतनाटकस्य प्रारम्भिकं स्वरूपं सम्भवति (द्विवेदी, ई.१९९५, पृ. २७६)

। नृत्यस्य भावानुकरणमूलत्वम्, नृत्तस्याङ्गविक्षेपणमूलत्वम्, नाटकस्य चावस्थानुकरणमूलत्वं वीक्ष्य डा. एस. पी खत्री म्याक्डोनलमतस्य पूर्णत औचित्यहीनत्वं प्रतिपादितवानस्ति । तदनुसारेण रसाश्रितत्वान्नाट्यं वाक्यार्थाभिनयमपेक्षते चेन्नृत्यं शब्दार्थाभिनयं प्रदर्शयद् भावाभिव्यक्तिमपेक्षते । प्रथमे कथोपकथनं प्राणत्वेन स्थितं भवति चेद् द्वितीये तस्याभाव एवा नितराम् । नाट्यं श्रोत्रचक्षुषोर्विषयो भवति चेन्नृत्यं चक्षुर्विषय एव । अतो नाट्यं नृत्यमेवेति म्याक्डोनलमतं नोचितमिति खत्रीविचारो वर्तते (शुक्ला, ई.२००४, पृ. २१-२२) । म्याक्डोनलमतस्य खण्डनं कुर्वता डा. वीरराघवनमहोदयेनापि खत्रीविचार एव समर्थितो विद्यते (शुक्ला, ई.२००४, पृ. २२) ।

पिशेलमहोदयेन पुत्तलिकानृत्यस्य नाट्योद्गमविन्दुत्वं सूचितमस्ति । भारते प्रारब्धं पुत्तलिकानृत्यं पश्चाद् ग्रीसादिदेशेषु प्राप्तमिति तस्य विचारोऽस्ति । मयपुत्र्या सोमप्रभया स्वसख्यै कलिङ्गप्रभायै नृत्यादिसमर्थानां पुत्तलिकानां प्रदानस्य प्रसङ्गः कथासरित्सागरे प्रवर्णितो विद्यते । पिशेलानुसारेण विश्वसाहित्येऽयमेव पुत्तलिकानां प्रथमः प्रसङ्गः (द्विवेदी, ई.१९९५, पृ. २७४) । राजशेखरस्य बालरामायणेऽपि काष्ठपुत्तलिकाप्रसङ्ग उपस्थापितोऽस्ति । शङ्करपाण्डुरङ्गपण्डितस्यानुसारेण कन्नडप्रदेशे काष्ठपुत्तलिकानां नृत्यप्रदर्शनकारिणी रङ्गशालाऽऽसीत् । तासां नृत्यं सूत्रेण नियन्त्रितो भवति स्म, यः सूत्रं गृहीत्वा तन्नृत्यनियन्त्रणं करोति स्म, स सूत्रधार उच्यते स्म । नाट्यक्षेत्रे नाट्यनियन्त्रकस्य सूत्रधारनाम्ना व्यवहारोऽपि पुत्तलिकानृत्येनैव सम्बद्धोऽस्तीति पिशेलाभिमतिरस्ति (द्विवेदी, ई.१९९५, पृ. २७४) । हिलब्राण्डमहोदयस्यानुसारेण पुत्तलिकानृत्यान्नाट्योद्गमः पूर्ववर्ती विद्यते । नाट्यनियन्त्रकस्य सूत्रधारत्वं पुत्तलिकानृत्येन सह सम्बद्धं नास्ति, अपि तु सूत्ररूपेण नाट्यवस्तुनः कथयितृत्वेन तस्य सूत्रधारनाम्ना व्यवहारो विहितो वर्तत इति हिलब्राण्डमहोदयस्य विचारोऽस्ति (द्विवेदी, ई.१९९५, पृ. २७४) ।

नाट्यशास्त्रमर्मज्ञेन ल्युडर्समहोदयेन नाट्यारम्भविन्दुत्वं छायानाट्ये निक्षिप्तं वर्तते । पातञ्जलमहाभाष्ये मूकाभिनयकर्तुः सौभिकस्य प्रसङ्ग उपस्थापितोऽस्ति । सौभिको यवनिकायाः पृष्ठभागे छायानां प्रदर्शनेन मूकतयैव कथाकथनं करोति । उत्तररामचरितस्य तृतीयाङ्के सीतायाश्छायाप्रवेशस्य प्रसङ्गो वर्तते चेन्महाभारते बृहत्संहितायां च रूपजीवित्वेन छायानाट्यकृत् सूचितो विद्यते । रत्नावल्याम्, प्रबोधचन्द्रोदये, दशकुमारचरिते च वर्णिता ऐन्द्रजालिकाः प्रायेण छायानाट्यकर्तार एव । एवंविधैः साक्ष्यैर्नाट्यारम्भो छायानाट्याज्जात इति ल्युडर्सादयो विद्वांसः साधयितुं यतमाना आसन् । नाट्याच्छायानाट्यस्य परवर्तित्वादेषां मतानां स्वतः खण्डनं भवतीति पारसनाथद्विवेदिनोऽभिमतिरस्ति (द्विवेदी, ई.१९९५, पृ. २७६) ।

रिजवेमहाभागस्यानुसारेण नाट्यारम्भो वीराणां सम्माने आयोज्यमानेभ्य उत्सवेभ्योऽजायत, यत्र गायनं वादनं लोकनृत्यं च भवति स्म । पारसनाथमते एतत् तु सम्भवेत्, यतो हि नाट्योद्गमे लोकपरम्पराणाम्, लोकोत्सवानाम्, लोकनृत्यनां च महत्त्वपूर्णमवदानं भवेत् । रामलीला, कृष्णलीला, होलिकोत्सवः, दुर्गापूजनमहोत्सव इत्याद्याः धर्मानुप्राणिताः परम्परा नाट्योद्गमे प्रेरणास्पदाः स्युः । प्रातःकालिक्याः सुवेषायाश्चञ्चच्चाकचिक्याया उषसोऽभिनयस्य, पुष्पपरागसहितस्य समदस्य मरुतो नृत्यस्य, उत्प्लवमानानां पक्षिणां नृत्यसङ्गीतयोः, कमलवनभ्रमणशीलानां समदानां भ्रमराणां मधुरगीतस्य, प्रकृतिवध्वा मनोहारिणां हावभावादीनां च दर्शनेन स्वत एव मनोमयूरिका नृत्यति । एभ्यः प्राकृतिकव्यवहारेभ्यो नाट्यस्य नृत्यस्य चोत्पत्तिः

सञ्जाता स्यात्, तदाद्यं स्वरूपं लोकाभिनयो लोकनृत्यं वा भवेत्, पश्चाच्च संस्कारैः परिष्कृतं सत् तदेव रूपं शास्त्रीयं नाट्यादिकं सम्पन्नं स्यात् (द्विवेदी, ई.१९९५, पृ. २७६)।

कीथोऽपि साधारणजनानां समक्षं प्राकृतिकपरिवर्तनानां मूर्ततया प्रदर्शनाय नाट्यस्य प्रवर्तनमृषिभिर्विहितं स्यादिति निर्दिष्टवान् वर्तते। स स्वविचारस्य पुष्टये कंसवधाख्यं नाटकमुदाहृत्य हेमन्ततौ वसन्तर्तोर्विजयप्रदर्शनमेव तस्य नाटकस्योद्देश्यं स्यादिति निगदितवानस्ति यतो हि तत्र कंसवधाख्ये नाटके कृष्णानुयायिनो वसन्तर्तोः प्रतीकत्वेन रक्तं वस्त्रं कंसानुयायिनश्च हेमन्तर्तोः प्रतीकत्वेन कृष्णं वस्त्रं धारयन्ति। होलिकोत्सवेऽपि हिरण्यकशिपुं प्रति भगवतो विष्णोर्विजयं प्रदर्श्य लोकोऽधर्मं प्रति धर्मस्य विजयरूपया शिक्षया शिक्षितो वर्तते । नाट्यशास्त्रानुसारेण नाट्यविघ्नकृतां दानवानां जर्जरीकरणस्य स्मृतौ आयोज्यमान इन्द्रध्वजोत्सवोऽप्येवमेव लोकान् पापविनाशस्य सुनिश्चिततां द्रढयति (द्विवेदी, ई.१९९५, पृ. २७७) । नाट्योद्गमस्य कारणत्वमिमे एव प्रसङ्गा वोढुमर्हन्ति।

प्रागैतिहासिकयुगस्य सूचका ईषदेव स्मारका अद्य लभ्यन्ते, तत्र नर्तकानां नर्तकीनां च या मूर्तयो दृश्यन्ते, तास्तस्मिन् युगेऽपि नाट्यस्य वर्तमानत्वं सूचयन्ति । भाषाया उत्पत्तेः प्रागपि जना आङ्गिकाभिनयैर्विचारसम्प्रेषणं कृतवन्तो भवेयुरित्यनुमानमपि सभ्यताया आदिमकाले एव नाट्यबीजस्योद्गमं साधयति। तस्मिन्नाङ्गिकाभिनये भाषाया विकासानन्तरं संवादस्य, सङ्गीतस्य विकासानन्तरं च गीतस्य योजनं विहितं भवेत्। एवं सोऽभिनयः पश्चान्नाट्यत्वेन विकसितो भवेत्। सभ्यतायाः प्रारम्भकाले तन्नाट्यं लोकोत्सावादौ प्रदर्शितं भवेत् (द्विवेदी, ई.१९९५, पृ. २७९)। पश्चात् तेन काव्यताऽऽपादिता स्यात्।

**उपसंहारः**

एवं पौरस्त्यनाट्यकलाया उद्गमस्य विषये विविधैर्विद्वद्भिर्विविधा विचारा उपस्थापिताः सन्ति। नाट्योत्पत्तेः सन्दर्भे उपस्थापितानां तेषां विद्वद्विचाराणां समीक्षणेन प्रथमतः नाट्यस्यादिमस्वरूपस्यारम्भो सभ्यतायाः विकाससमकलामेवाभवदिति निश्चेतुं शक्यते। यदि वैदिकवाङ्मयानां निभालनं क्रियते तर्हि केषाञ्चिन्नाट्यतत्त्वानां तत्रोपलब्धिर्दृश्यते। तेन पौरस्त्यवाङ्मये नाट्यानामादिबीजं वेदेष्वेवोपलभ्यते । यवनिकाशब्दे ग्रीकभाषायाः प्रभावं वीक्ष्य यद्यपि विन्डिसादयः केचित् पाश्चात्त्याः पौरस्त्यनाटकोत्पत्तौ ग्रीसनाट्यस्य प्रभावं प्रदर्शयितुं यतमाना दृश्यन्ते, तथापि म्याक्समूलर-पिसेल-लेबी-कीथ-म्याक्डोनलादिभिर्विद्वद्भिर्नाट्योत्पत्तेः स्थलत्वेन भारतवर्ष एव स्वीकृतोऽस्ति। भारतवर्षस्य लोकसंस्कृतौ बहुत्र नाट्यबीजानां नृत्यगीतवादित्रादीनां सत्त्वाल्लोकसंस्कृतिरपि नाट्यारम्भस्य कारिक भवितुं शक्नोति। रामायणादीनां काले तु नाट्यस्य सर्वथा विकासः, तत्सिद्धान्तादीनां विमर्शश्च जातो दरीदृश्यते। वैदिकवाङ्मये संवादादीनां केषाञ्चिदेव नाट्यसम्बद्धानां तत्त्वानां प्रयोगः समुल्लेखश्च प्राप्यते चेद् रामायणमहाभारतादिषु नाट्यकलायास्तदवयवानां चोल्लेखप्रयोगौ बहुत्र प्राप्येते । रामायणमहाभारतयोः कालानन्तरं नाट्यसिद्धान्तानां स्थापना सम्पन्नाऽभवदिति अष्टाध्यायी-महाभाष्य-अर्थशास्त्र-कामसूत्र-जातककथादीनां समीक्षणेन वक्तुं पार्यते। लोकसाहित्यस्याध्येतॄणां विदुषामनुसारेण मानवस्य क्रीडासम्बद्धाऽनुकरणसम्बद्धा वा या स्वाभाविकी प्रवृत्तिरस्ति, सैव नाट्यकलाया जननी वर्तते। तस्य मूले च प्राकृतिकस्य वातावरणस्य प्रभावोऽवश्यं भवति । जन्मकालत आरभ्यैव बालके सहजतया दृष्टास्वनुकरणप्रवृत्तिषु, किशोरावस्थायां तत्र दृष्टेषु स्वभावपरिवर्तनादिषु, युवावस्थायाः प्रथमसोपानप्राप्तेः समकालमेव तत्स्वभावान्तः प्रविष्टे उन्मादे, तस्मिन् दृष्टायां स्वाभाविक्यामुच्छृङ्खलतायाम्,

तस्मिन् समुत्पन्नायां स्फूर्तौ, तत्स्वच्छन्दक्रीडायां च नाट्यबीजानि द्रष्टुं शक्यन्ते । लौकिकसंस्कृतावपि नाट्यबीजानां नृत्यगीतवादित्रादीनां संवादतत्त्वस्य च सत्त्वात् नाट्यारम्भे लौकिकसंस्कृतिरपि हेतुत्वं वहति । नाट्यसम्बद्धानां तत्त्वानां वेदस्य संहितासु ब्राह्मणेष्वारण्यकेषूपनिषत्सु च क्वचिच्चर्चा लभ्यते, क्वचिच्च प्रयोगः प्राप्यते । अतो लेख्यतायां नाट्यारम्भस्य बीजं वैदिकवाङ्मयेषु दृश्यते । पौराणिकसाहित्ये तु बहुत्र नाट्यतत्त्वानां सचर्चं प्रयोग उपवर्णितोऽस्ति । नाट्यप्रयोगस्य चर्चा च रामायणमहाभारतपुराणादिषु बहुत्र प्राप्यते । अतो पौराणिकं साहित्यं नाट्यारम्भस्य द्रढीयानाधारो भवितुमर्हति । एवं प्राणिनां स्वाभाविकप्रवृत्तित आरब्धं नाट्यबीजं लोकसंस्कृतौ सतत्त्वं विकसितमभवत्, वैदिकवाङ्मयेषु नाट्यतत्त्वैर्लेख्यं रूपं प्राप्तम्, पौराणिके काले तस्य प्रयोगो विकसित इति निष्कर्षेण वक्तुं शक्यते ।

## सन्दर्भसूची


कालिदासः (ई. १९९३). *मालविकाग्निमित्रम्* (पाण्डेय, रमाशङ्कर, व्याख्या.). चौखम्बा सुरभारती प्रकाशन ।

कौटिल्यः (ई. १९८४). *अर्थशास्त्रम्* (गैरोला, वाचस्पति, व्याख्या.). चौखम्बा विद्याभवन । https://archive.org/details/kautilya-chanakya/Kautilya%20Arthasastra%20-%20Shri%20Vachaspati%20Gairola/mode/2up?q

द्विवेदी, पारसनाथ (ई. १९९५). *नाट्यशास्त्र का इतिहास*. चौखम्बा सुरभारती प्रकाशन । https://archive.org/details/natyashastrakaitihasdr.parasnathdwivedi/mode/2up?q

पाणिनिः (ई. १९९८). *अष्टाध्यायी* (त्रिपाठी, राजकिशोर मणि, सम्पा.). संस्कृत सेवा संस्थान । https://archive.org/details/asthadhyayi-rajkishor-mani-tripathi/page/n3/mode/2up?q

पाण्डेय, श्यामारमण (ई. १९७४). *कालिदास का नाट्यकल्प*. अनुपम प्रकाशन । https://epustakalay.com/book/63324-kalidas-ka-natyakalp-by-shyamnarayan-pandey/

भरतः (२०४०). *नाट्यशास्त्रम् (प्रथमो भागः)* (शास्त्री, बाबुलाल शुक्ल, सम्पा.). चौखम्भा संस्कृत संस्थान ।

वात्स्यायनः (१९८६). *कामसूत्रम्* (दामोदर शास्त्री, सम्पा.). यशोधरः (टीका.). चौखम्बा संस्कृत सीरीज ।

वाल्मीकिः (२०१७). *रामायणम् (प्रथमो भागः)* (पाण्डेय, रामनारायणदत्त शास्त्री, अनु.). गीताप्रेस ।

वाल्मीकिः (२०१७). *रामायणम् (द्वितीयो भागः)* (पाण्डेय, रामनारायणदत्त शास्त्री, अनु.). गीताप्रेस ।

व्यासः (ई. १९६९). *महाभारत आरण्यकपर्व* (सातवलेकर, श्रीपाद दामोदर, सम्पा.). स्वाध्याय मण्डल ।

व्यासः (ई. १९६९). *महाभारत भीष्मपर्व* (सातवलेकर, श्रीपाद दामोदर, सम्पा.). स्वाध्याय मण्डल ।

व्यासः (ई. १९६९). *महाभारत विराटपर्व* (सातवलेकर, श्रीपाद दामोदर, सम्पा.). स्वाध्याय मण्डल ।

व्यासः. (२०८०). *श्रीमद्भागवतम्*. गीताप्रेस।

व्यास, रेखा (अनु.). (ई. २०१५). *यजुर्वेद*. संस्कृत साहित्य प्रकाशन। https://archive.org/details/20220425_20220425_0610/mode/2up?q

शर्मा, गङ्गा सहाय (अनु.). (ई. २०१५). *अथर्ववेदः*. संस्कृत साहित्य प्रकाशन। https://archive.org/details/20200426_20200426_0448

शर्मा, गङ्गा सहाय (अनु.). (ई. २०१५). *ऋग्वेदः*. संस्कृत साहित्य प्रकाशन। https://archive.org/details/20200426_20200426_0846

शुक्ला, कीर्ति (ई. २००४). संस्कृत रूपकों में पूर्वरङ्गविधान एक समीक्षात्मक अध्ययन [विद्यावारिधिशोधप्रबन्धः, संस्कृत विभाग, इलाहावाद विश्वविद्यालय]। https://archive.org/details/in.ernet.dli.2015.475342/mode/2up?q

सिद्धान्तशिरोमणि, विश्वेश्वर (ई. १९६०). *अभिनवभारती का तीन अध्याय* (नागेन्द्र, सम्पा.). हिन्दी विभाग, दिल्ली विश्वविद्यालय।

स्वामी, के. एन. (ई. २०२०). संस्कृत शब्दकोश (App.). Retrieved 2026/01/12, from knswami.com